तृतीयः पाठः

# यक्षयुधिष्ठिरसंवादः

[अयं पाठः व्यासरचितस्य महाभारतस्य वनपर्वणः (अध्यायः-313) संकलितः। महाभारतं संस्कृतभाषायाः विशालतमो ग्रन्थः लक्षश्लोकात्मकः। अस्मिन् ग्रन्थे अष्टादश पर्वाणि सन्ति। तेषु वनपर्व अन्यतमम्। तत्र पाण्डवाः वने विचरन्ति। एकदा ते एकं सरोवरं गताः। तस्य स्वामी यक्षः। ये सरोवरात् जलं पातुम् इच्छन्ति, तान् स यक्षः प्रश्नान् करोति। उत्तरम् अदत्त्वा ये जलं पिबन्ति ते मूर्च्छिताः पतन्ति। सैव गतिः भीमस्य अर्जुनस्य नकुलस्य सहदेवस्य च जाता। अन्ततः युधिष्ठिरः तत्र गतः। स एव यक्षप्रश्नानां समुचितम् उत्तरं ददाति। प्रश्नोत्तरेषु नीतिः सदाचारश्च वर्णितौ।]

**यक्षः-** केन स्विदावृतो लोकः केनस्विन्न प्रकाशते ।
केन त्यजति मित्राणि केन स्वर्गं न गच्छति ॥1॥

**युधिष्ठिरः-** अज्ञानेनावृतो लोकस्तमसा न प्रकाशते ।
लोभात् त्यजति मित्राणि सङ्गात् स्वर्गं न गच्छति ॥2॥

**यक्षः-** किं ज्ञानं प्रोच्यते राजन् कः शमश्च प्रकीर्तितः ।
दया च का परा प्रोक्ता किं चार्जवमुदाहृतम् ॥3॥

**युधिष्ठिरः-** ज्ञानं तत्त्वार्थसम्बोधः शमश्चित्तप्रशान्तता ।
दया सर्वसुखैषित्वमार्जवं समचित्तता ॥4॥

**यक्षः-** कः शत्रुर्दुर्जयः पुंसां कश्च व्याधिरनन्तकः ।
को वा स्यात् पुरुषः साधुरसाधुः पुरुषश्च कः ॥5॥

**युधिष्ठिरः-** क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिरनन्तकः ।
सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः ॥6॥

यक्षः- किं स्थैर्यमृषिभिः प्रोक्तं किं च धैर्यमुदाहृतम् ।
स्नानं च किं परं प्रोक्तं दानं च किमिहोच्यते ॥ ÷॥

युधिष्ठिरः- स्वधर्मे स्थिरता स्थैर्यं धैर्यमिन्द्रियनिग्रहः ।
स्नानं मनोमलत्यागो दानं वै भूतरक्षणम् ॥8॥

यक्षः- कः पण्डितः पुमाञ्ज्ञेयो नास्तिकः कश्च उच्यते ।
को मूर्खः कश्च कामः स्यात् को मत्सर इति स्मृतः ॥9॥

युधिष्ठिरः- धर्मज्ञः पण्डितो ज्ञेयो नास्तिको मूर्ख उच्यते ।
कामः संसारहेतुश्च हृत्तापो मत्सरः स्मृतः ॥10॥

## शब्दार्थाः

| | | |
|---|---|---|
| **स्मृतः** | कचितः | कहा गया है |
| **प्रकीर्तितः** | कथितः | कहा गया है |
| **प्रोच्यते** | विशेषेण कथ्यते | बताया गया है |
| **आवृतः** | आच्छन्न | घिरा हुआ |
| **तमसा** | अन्धकारेण | अन्धकार से |
| **शमः** | मनसः शान्तिः | चित्तशान्ति |
| **पुंसाम्** | पुरुषाणाम् | पुरुषों के |
| **केनस्वित्** | केन | किस से |
| **भूतरक्षणम्** | जीवानां रक्षा | जीवों की रक्षा |
| **मत्सरः** | ईर्ष्या | डाह, जलन |
| **हृत्** | हृदयम् | हृदय |
| **सुखैषित्वम्** | सुखस्य इच्छा | सुख की कामना |

## व्याकरणम्

**( क ) सन्धिविच्छेदः–**

| | | |
|---|---|---|
| **केनस्विदावृतः** | – | केनस्वित् + आवृतः |
| **केनस्विन्न** | – | केनस्वित् + न |
| **अज्ञानेनावृतः** | – | अज्ञानेन + आवृतः |
| **लोकस्तमसा** | – | लोकः + तमसा |
| **प्रोच्यते** | – | प्र + उच्यते |
| **युधिष्ठिरः** | – | युधि + स्थिरः |
| **दुर्जयः** | – | दुः + जयः |
| **व्याधिरनन्तकः** | – | व्याधिः + अनन्तकः |
| **साधुरसाधुः** | – | साधुः + असाधुः |
| **निर्दयः** | – | निर् + दयः |
| **किमिहोच्यते** | – | किम् + इह + उच्यते |
| **पुमाञ्ज्ञेयः** | – | पुमान् + ज्ञेयः |
| **कश्च** | – | कः + च |

## अभ्यासः ( मौखिकः )

**1. संस्कृतभाषया उत्तराणि वदत–**

(क) केनस्वित् आश्रितो लोकः?

(ख) किं ज्ञानम्?

(ग) पुंसां दुर्जयः शत्रुः कः?

(घ) कः अनन्तकः व्याधिः?

(ङ) कः साधुः?

(च) कुतः मित्राणि त्यजति?

(छ) केन स्वर्गं न गच्छति?

(ज) का दया?

(झ) किं ज्ञानम्?

(ञ) किं स्थैर्यम्?

## अभ्यासः ( लिखितः )

**1. एकवाक्येन संस्कृतभाषया उत्तराणि लिखत-**

(क) किं धैर्यमुदाहृतम्?

(ख) स्नानं किमुच्यते?

(ग) भूतानां लक्षणं किमस्ति?

(घ) कः पुमान् पण्डितः ज्ञेयः?

(ङ) संसारहेतुः कोऽस्ति?

**2. उदाहरणम् अनुसृत्य अधोलिखितवाक्येषु रेखाङ्कि.तपदानि आधृत्य प्रश्नान् विरचयत–**

उदाहरणम्– **सूर्योदयेन अन्धकारः नश्यति।**

प्रश्नः– केन अन्धकारः नश्यति?

(क) तमसा लोकः न प्रकाशते ।

(ख) ज्ञानं तत्वार्थसम्बोधः ।

(ग) क्रोधः सुदुर्जयः शत्रुः ।

(घ) अनन्तकः व्याधिः लोभः ।

(ङ) स्वधर्मे स्थिरता स्थैर्यम् ।

**3. अधोलिखितवाक्येषु कोष्ठात् समुचितं पदमादाय रिक्तस्थानानि पूरयत–**

(क) लोकः .............. आवृतः। (**अज्ञानेन, ज्ञानेन**)

(ख) .............. सुदुर्जयः शत्रुः। (**लोभः, क्रोधः**)

(ग) अनन्तकः व्याधिः ............। (**लोभः, क्रोधः**)

(घ) साधुः ............ स्मृतः। (**सदयः, निर्दयः**)

(ङ) इन्द्रियनिग्रहः ............। (**अधैर्यम्, धैर्यम्**)

**4. सन्धिविच्छेदं कुरुत–**

केनस्विदावृतः, केनस्विन्न, सुखैषित्वम्, व्याधिरनन्तकः, प्रोच्यते।

## योग्यता-विस्तारः

धातुओं से लगने वाला क्त प्रत्यय भूतकाल के अर्थ में होता है। यहाँ इसके कुछ उदाहरण दिये जाते हैं।

| उपसर्ग + | धातु + | प्रत्यय | शब्द | पु० | स्त्री० | नपुं० |
|---|---|---|---|---|---|---|
| आ + | Öवृ + | क्त | आवृत | आवृतः | आवृता | आवृतम् |
| सम् + | Öबुध् + | क्त | सम्बुद्ध | सम्बुद्धः | सम्बुद्धा | सम्बुधम् |
| वि + | Öस्मृ + | क्त | विस्मृत | विस्मृतः | विस्मृता | विस्मृतम् |
| | Öवद् + | क्त | उक्त | उक्तः | उक्ता | उक्तम् |

**घञ् प्रत्यय**– यह भाव के अर्थ में होता है। जैसे–

Öपच् + घञ् – पाकः

Öत्यज् + घञ् – त्यागः

Öरुज् + घञ् – रोगः

Öलभ् + घञ् – लाभः

Öपठ् + घञ् – पाठः

Öभू + घञ् – भावः